२१७. महर्षि व्यासानुसारेण चित्तवृत्तीनां कतिधा विभागं कृतम्? ✓

उ. "पञ्च"। "क्षिप्तं मूढं विक्षिप्तम् एकाग्रं निरुद्धमिति चित्तभूमयः" अर्थात्
क्षिप्तं, मूढं, विक्षिप्तम्, एकाग्रं निरुद्धमिति पञ्च चित्तभूमयः भवन्ति।

२२०. मूढावस्था नाम किम्? एतस्याः कारणं लक्षणं च स्पष्टयत। ✓

उ. मूढावस्थायां चित्तं यदा इन्द्रियाणां विषये अनुरक्तो भवति तदा साधकः सत्यचिन्तने अयोग्यो भवति एतत् कारणात् सः विवेकरहितकार्येषु संलग्नो भवति इयमेव अवस्था मूढावस्था उच्यते।

<u>कारणं</u> → कामं, क्रोधं, लोभः मोहश्च इति।

<u>लक्षणं</u> → निद्रा, तन्द्रा, भयं, मोहः, आलस्यं दीनतादिषु मनुष्यस्य प्रवृत्तिर्भवति। एतस्यामवस्थायां तमोगुणप्रधानो भवति। रजः सत्वं च अभिभूतो भूत्वा गौणरूपेण तिष्ठति। एषा अवस्था अधममनुष्याणामस्ति।

२२१. चित्तस्य क्षिप्तावस्था किमस्ति? कारणं लक्षणञ्च लिखत। ✓

उ. यः चित्तः स्वभावतः अत्यन्त अस्थिरोऽस्ति, यस्मिन् ~~चित्ते~~ चित्ते अतीन्द्रियविषयाणां विचारणाय यादृश स्थिरता बौद्धिकशक्तेश्च आवश्यकता वर्तते तादृश न भवति येन साधकः विषयोन्मुखी भूत्वा सुखं दुःखञ्च भुङ्क्ते। एतदेव क्षिप्तावस्था अस्ति।

<u>कारणं</u> → रागः-द्वेषम् इत्यादयः

Scanned with CamScanner

उ→ धर्माधर्मं, रागविरागं, ज्ञानमज्ञानम्, ऐश्वर्य-अनैश्वर्यं च इत्यादिषु प्रवृत्तिर्भवति। अवस्थायामस्यां रजोगुणस्य प्रधानता भवति। सत्वतमश्च अभिभूतो भूत्वा तिष्ठति। सांसारिक मनुष्याणाम् एतादृशी अवस्था भवति। ⑥

२२२. चित्तस्य विक्षिप्तावस्था नाम किम्? कारणं लक्षणं च स्पष्टयत। ✓

उ. विक्षिप्तः अर्थात् यद् क्षिप्ततः विशिष्टं भवति। अधिकतया योगसाधकानाम् चित्तस्य विक्षिप्तावस्था भवति। यस्याम् अवस्थायां कदाचित् चित्तः शान्तो भवति कदाचित् अशान्तः इति। एतदेव विक्षिप्तावस्था अस्ति।

कारणं → कर्मयोगम्

लक्षणं → मुखोपरि प्रसन्नता, श्रद्धा, धैर्य, चैतन्यं, ओजं, दानं, करुणा इत्यादयः सद्गुणाः दृश्यते। अस्यामवस्थायां सत्वगुणस्य प्रधानता भवति। तमोरजश्च अभिभूतो भूत्वा तिष्ठति परञ्च रजोगुणस्य स्वभावात् यदा-कदा व्यक्तेः चित्तः विक्षेपोऽपि भवति। एषा एतादृशी अवस्था सामान्यतः विशिष्टमनुष्याणां भवति।

२२३ चित्तस्य एकाग्रावस्था किं भवति? कारणं लक्षणं च स्पष्टयत। ✓

उ. एकाग्रः अर्थात् चित्तस्य लक्ष्योपरि एकाग्रीकरणं। यदा मनुष्यः चतुर्विंशतिः होरासु अधिकांशतः एकाग्रचित्तो भूत्वा तिष्ठति। एतस्यामवस्थायाम् चित्तः निर्मलस्फटिक सदृशो भवति।

कारणं → जिज्ञासायाः प्रवृत्ति निरन्तरम् उत्पद्यते।

लक्षणं → निष्कामकर्मकः, राग-द्वेषः, कामं, क्रोधं, लालसा मोहादिकञ्च रहितो भवति। सत्वगुणस्य प्रधानता भवति। तमोरजश्च अभिभूतो भूत्वा तिष्ठति एतादृशी अवस्था योगीनां भवति एतस्याः अवस्थायाः अन्तिमावस्था विवेकख्यातिः वर्तते। योगीदर्शने एषा अवस्था 'सम्प्रज्ञातसमाधि' उच्यते।

२२४. निरुद्धावस्था नाम किम्? कारणं लक्षणं च स्पष्टयत। ✓

उ. निरुद्धः अर्थात् यदा सर्वेषां वृत्तीनां पूर्णतया स्थगनं भवति एवञ्च विवेक-ख्यात्याः अपि वैराग्यभावो उत्पद्यते तदा या अवस्था भवति सा निरुद्धावस्था उच्यते।

कारणं → स्वाभाविकगुणः।

लक्षणं → यदा योगी सम्प्रज्ञातसमाधौ अपि दोषान् पश्यति एवञ्च तेनोत्पन्नः 'परवैराग्यः' न्यूनं भवति तदा असम्प्रज्ञात समाधिः, ईश्वरसाक्षात्कारस्य च उत्पन्ना भवति तथा च योगीः परमानन्दः, सात्विकानन्दस्य भवति। अस्मिन् समये स्वभाविकं अस्वभाविकवृत्तीनां च अभावो भवति। द्रष्टुः स्वरूपस्थितिः उत्पद्यते।